


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
**Impact Factor:** RJIF 5.12
IJAAS 2020; 2(1): 71-72
Received: 05-11-2019
Accepted: 16-12-2019

**चन्दन कुमार झाः**
गवेषक, स्नातकोत्तर–ज्योतिष विभाग, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**चन्दन कुमार झाः**
गवेषक, स्नातकोत्तर–ज्योतिष विभाग, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# जातकर्म–नामकरण–संस्कार–विमर्शः

**चन्दन कुमार झाः**

**प्रस्तावना**

जातस्योत्पन्नस्य कर्म वैदिकसंस्कारविशेषः यः स जातकर्मशब्देनोच्यते। संस्कार– विशेषोऽयं नालच्छेदनात् प्रागेव विधीयते, यतोहि नालच्छेदनानन्तरं सूतकजन्यमशौचं प्रारभ्यते। तद्यथोक्तं मनुना–[1] 'प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते' इति। एवमेव वशिष्ठेनाप्युक्तम्–[2] 'यस्मिन् मुहूर्ते जनितः कुमारस्तस्मिन् विधेयं खलु जातकर्म' इति। तथैवोक्तं जैमिना–[3]

**'यावन्नोच्छिद्यन्ते नालं तावन्नाप्नोति सूतकम्।**
**छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते।।' इति।**

एवमत्र नालच्छेदनात् प्रागेव विधीयमानस्य संस्कारविशेषस्य मुहूर्तस्य किमपि न प्रयोजनमिति स्फुटं भवति। परमत्रापि–[4]

**'व्यतीपाते च सङ्क्रान्तौ ग्रहणे वैधृतावपि।**
**श्राद्धं विना शुभं कर्म प्राप्तकालेऽपि नाचरेत्।।' इति।**

अन्यच्च–[5]

**'अमासङ्क्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत्।'**

इतिगर्गोक्तवचनाभ्यां संक्रान्त्यादिदुष्टकालेषु श्राद्धं विहाय किमपि शुभाचरणं न भवति, अतो जातकर्म अपि न विधेयम्। एवमेव देशान्तरगतो राजगृहादौ निरुद्धो वा पिता जातकर्मादि कर्तुमशक्नुवन् पश्चात् प्रतिबन्धापवादेन गृहमागतोऽपि सन्नेव करोति, यतस्तदैव जन्माभावात् सूतकप्रवेशश्च। तद्यथोक्तं वैजवापेन–[6]

**'जन्मतोऽनन्तरं कार्यं जातकर्म यथाविधि।**
**दैवादतीतः कालश्चेदतीते सूतके भवेत्।।' इति।**

अत एवात्र कालविकल्पोऽभिहितो नारदसंहितायाम्–[7]

**'तस्मिन् जन्ममुहूर्ते तु सूतकान्ते तथा शिशोः।**
**जातकर्म च कर्त्तव्ये पितृपूजनपूर्वकम्।।' इति।**

अतः अस्माद् अतिक्रान्तकालेऽपि अवश्यमेव जातकर्मादिमुहूर्त्तं विचार्य इति स्फुटं भवति। अतस्तत्र अतिक्रान्तकालत्वात् सूतकानन्तरं एकादशेऽह्नि द्वादशेऽह्नि वा रिक्ताम्, अष्टमीम्, अमावस्यां, पूर्णिमां संक्रान्तिदिवसञ्च त्यक्त्वा शेषेषु [1, 2, 3, 5, 6, 7, 10, 11, 12, 13] तिथिषु, शुभग्रहाणां चन्द्र–बुध–गुरु–शुक्राणां वासरेषु,मृग–रेवती–चित्रानुराधा–उत्तरात्रय–रोहिणी–हस्त–अश्वि–पुष्य–स्वाती–पुनर्वसु–धनिष्ठा–शतभिषा–श्रवणादिषु षोडशनक्षत्रेषु जातकर्म नामकरणं वा कर्त्तव्यमित्युक्त वशिष्ठसंहितारत्नमाला–मुहूर्त्तगणपतिमुहूर्त्ततत्त्वमुहूर्त्तचिन्तामणि–मुहूर्त्तकल्पद्रुमादिषु ग्रन्थेषु आचार्यैरिति। तद्यथा वशिष्ठः–[8]

**'मृदुध्रुवक्षिप्रचरेषु भेषु चारिक्तपर्वाख्यदिनेषु कार्यम्।**
**शुभग्रहाणां दिनलग्नवर्गे तज्जातकर्म त्वथ नामधेयम्।।' इति।**

तथैव रत्नमालयामपि–[9]

**'मृदुध्रुवक्षिप्रचरेषु भेषु सूनोर्विधेयं खलु जातकर्म।**
**गुरौ भृगौ वापि चतुष्टयस्थे सन्तः प्रशंसन्ति च नामधेयम्।।' इति।**

उक्तञ्च मुहूर्त्तगणपतौ–[10]

**'जातकर्म शिशौ जाते पिता तत्कालमाचरेत्।**
**एकादशेऽह्नि वा कुर्याद् द्वादशे वा यथाविधि।।**
**रेवती द्वितये पुष्ये पुनर्वस्वनुराधयोः।**
**श्रवणादि त्रिभे हस्त त्रितये रोहिणी मृगे।।**
**त्र्युत्तरे जातकर्माद्यं कालातिक्रमणे विदुः।।' इति।**

अपि च मुहूर्त्ततत्त्वे [11]

**'जातं जातेथविष्ट्यादिवियुजिगदिते द्वादशाद्येऽह्नि नाम।**
**स्याद्वा सौम्याह्निमैत्रध्रुवलघुचरभे केन्द्रगैजेज्यशुक्रः।।' इति।**

अपि च मुहूर्त्तचिन्तामणौ–[12]

**'तज्जातकर्मादि शिशोर्विधेयं पर्वाख्यरिक्तोनतिथौ शुभेऽह्नि।**
**एकादशे द्वादशकेऽपि घस्रे मृदुध्रुवक्षिप्रचरोडुषु स्यात्।।' इति।**

अपि च मुहूर्त्तकल्पद्रुमे–[13]

**'कुर्याज्जातकर्म जन्मनि शिशो रात्राह्वयो सूतके,**
**स्नात्वा शीतजलेन वस्त्रसहितं नद्यादिषूदङ्मुखाः।**
**प्राङ्नाडीछिदितो न चेत्कृतमिदं तत्सूतकान्ते भवेन्,**
**मैत्रक्षिप्रचरध्रुवैः शुभदिने पर्वाख्यरिक्तोनिते।।'**

अत्र उपर्युक्तवचनेषु यथा एकादशे द्वादशे वा दिवसे जातकर्म नामकरणं वा कर्त्तव्यमित्युक्तं न तथा कविवरेण विवेचितमस्ति। तन्मते तु दशमे एकादशे वा दिवसे जातकर्म कर्त्तव्यमित्युक्तम्। वार–तिथि–नक्षत्रादयः सामान्यभेदेन उपर्युक्तानुरूपा एव विवर्णिताः सन्ति। तद्यथा पूर्वकालामृते कविवरेण चोक्तम्–[14]

**'जाते जातदिनादिरादशदिनात्तज्जातकर्मात्मजे,**
**कुर्याद्रुद्रदिनेऽथवा स्थिरचरक्षिप्राख्यमैत्रोडुषु।**
**रिक्तामारहितेऽप्यखण्डदिवसे लग्ने शुभे वासरे,**
**पूर्वाह्णेऽसुरपूजिते सुरगुरौ व्यक्ते च सौम्यायने।।' इति।**

अर्थात् आत्मजे कुमारे जाते सति, जातदिनादिः, जन्मदिवसमारभ्य आदश–दिनाद् दश–दिन–पर्यन्तं, दशदिनमध्ये यस्मिन्–कस्मिन् दिवसे, तज्जातकर्म आत्मजे पुत्रविषये कुर्यात्। अथवा रुद्रदिने एकादशेह्नि कुर्यात्। एकादशदिने अतीते सति स्थिर–चर–क्षिप्राख्य–मैत्रोडुषु स्थिराणि रोहिण्युत्तरात्रयं, चराणि स्वाती–पुनर्वसु–श्रवण–धनिष्ठा–शतभिषजः, क्षिप्राख्याः अश्वि–हस्त–पुष्याः, मैत्रोडुः अनुराधानक्षत्रम्। एतेषु नक्षत्रेषु रिक्तामारहिते रिक्ताः पूर्वोक्ताः अमा दर्शाः, एतैः रहिते अखण्डदिवसे शुभे शुभग्रहाधिपे लग्ने, तद्विधे वासरे, पूर्वाह्णे अह्नः पूर्वभागे, असुर–पूजिते शुक्रे, सुरगुरौ बृहस्पतौ च व्यक्ते= अनस्तङ्गते सति सौम्यायने जातकर्म कुर्यादित्युक्तं भवति।

अत्र उपर्युक्ते कविवरोक्त–वचनेऽस्मिन् मनु–वशिष्ठ–जैमिन्यादीनां वचनानां विरुद्धं जन्मदिनमारभ्य दशदिनपर्यन्तं यस्मिन्–कस्मिन्नपि दिवसे जातकर्म कर्त्तव्यमिति वर्णितमस्ति।

तथा चात्र तिथिविषये वशिष्ठप्रभृतिभिः मृगान्त्यचित्राभानि गृहीतान्यपि कविवरेण नोल्लिखतानि सन्ति। शेषाणि नक्षत्राणि वशिष्ठप्रमुखोक्तान्येव वर्णितानि सन्ति। तथात्रोक्ताः वारादयः वशिष्ठप्रमुखोक्तानुरूपा एव सन्ति।

नामकरणसंस्कारे चापि कविवरेण वशिष्ठप्रमुखोक्तैः किञ्चिद् विशेषमुक्तमस्ति। तद्यथा पूर्वकालामृते कविवरेणोक्तम्–[15]

**'जातानन्तरमेव नामकरणं त्वेकादशाहे स्फुटं,**
**पुत्रस्यैव समाक्षरं तु युवतेः कार्यं ततो व्यत्ययम्।**
**शुद्धिर्जातकवच्च नाम्नि सकलैस्तद्द्वादशे षोडशे,**
**द्वाविंशेऽप्यथ विंशकेऽह्नि विहितं जातिव्यवस्थां विना।।' इति।**

अर्थात् जातानन्तरमेव नामकरणं एकादशाहे एकादशदिने, स्फुटं व्यवहारनाम व्यक्तं, कर्त्तव्यमित्यर्थः। पुत्रस्यैव समाक्षरं नाम कर्त्तव्यं, यथा– शिवः, महेश्वर इत्यादयः।

युवतेः कन्यायास्तु, ततः पुरुषाद् व्यत्यं विषमाक्षरं नाम, यथा– पार्वती भवानी इत्यादि कार्यम्। नाम्नि नामकरणे, शुद्धिः लग्नादिशुद्धिः जातकर्मवत् सकलैः चातुर्वर्णैः, जातिव्यवस्थां विना, जातिभेदं विना, जन्मतः द्वादशे, षोडशे, द्वाविंशे, अथवा विंशकेऽह्नि दिवसे वा तन्नामकरणं विहितमावश्यकम् इत्युक्तमस्ति।

अत्र उपर्युक्ते कविवर–वचनेऽस्मिन् षोडशे–द्वाविंशे–विंशके वा दिवसे नामकरणं कर्त्तव्यमिति वशिष्ठप्रमुखोक्ताद् विशेषमुक्तमस्ति। तद्यथा शेषकालशुद्धिविषयाः पूर्वोक्तानुरूपा जातकवत् ग्राह्या इत्युक्तमस्तीति शम्।

**सन्दर्भ–सूची–**


1. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–238–239
2. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–238
3. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–239
4. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–239
5. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–239
6. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–239
7. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–239
8. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–239
9. मुहूर्तचिन्तामणि, पीयूसधारा, पृ0–238
10. मुहूर्तगणपति संस्कार प्रकरण, श्लोक–124–126
11. मुहूर्ततत्त्व, संस्कार प्रकरण, श्लोक–4
12. मुहूर्तचिन्तामणि, संस्कार प्रकरण, श्लोक–11
13. मुहूर्तकल्पद्रुम, संस्कार कुसुम, श्लोक–17
14. पूर्वकालामृत, बिन्दु–प्रथम, श्लोक–16
15. पूर्वकालामृत, बिन्दु–प्रथम, श्लोक–17